पुनः विषमज्वरं करोति। ज्वरोत्सृष्टस्य वेति वाशब्देनेति बोध्यते। प्रथमतोऽपि विषमज्वरो भवति। यत उक्तम्। आरम्भाद्विषमो यश्चित्यादिकम्। धातुं दूषयित्वा कं विषमज्वरं करोतीत्यपेक्षायामाह।

"सन्ततं रसरक्तस्थः सततं रक्तधातुगः।
दोषः क्रुद्धो ज्वरं पुंसां सोऽन्येद्युः पिशिताश्रितः।
मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः।
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्।"

अन्तकं अन्तकमिव मारकत्वात्। *। विषमज्वरस्य सामान्यलक्षणमाह।

"यः स्यादनियतात् कालाच्छीतोष्णाभ्यां तथैव च।
वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः।"

यस्त्वनियतात् कालात् स्यादित्यस्यायमर्थः। यथा, वातिको ज्वरः सप्तदिनानि पैत्तिको दश दिनानि श्लैष्मिको द्वादश दिनानि दोषाणां प्राबल्ये वातिकश्चतुर्दश दिनानि पैत्तिको विंशतिदिनानि श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात् तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः। शीतोष्णाभ्यां गुणाभ्यां स्यात्।

"वेगतश्चापि विषमः कदाचिदपि वेगवान्।"

कदाचिदपि शान्तवेगः। विषमज्वरस्य भेदानाह।

"सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ।"

तत्र सन्ततस्य लक्षणमाह।

"सप्ताहं वा दशाहं वा द्वादशाहमथापि वा।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते।"

त्रिकल्पो वातिकादिभेदात्। सन्तत्या नैरन्तर्य्येण अविसर्गी अपरित्यागी। ननु मुक्तानुबन्धित्वं विषमत्वमिति विषमलक्षणं तदत्र न घटत इति कथमयं विषमेषु पठ्यते। घटत एव इति न दोषः। यत उक्तं चरकेण।

"विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणम्।
दुर्लभोपशमः कालं दीर्घमप्यनुवर्त्तते।"

यत्तु खरनादः।

"ज्वराः पञ्च च ये प्रोक्ताः पूर्व्वं सततकादयः।
चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः।"

इति। तच्चिरेण त्यागाभिप्रायेण। *। सततलक्षणमाह।

"अहोरात्रे सततको द्वौ कालावनुवर्त्तते।"

द्वौ कालौ अहन्येककालं रात्रावेककालम्। यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन।

"वयोऽहोरात्रिभुक्तानामन्तमध्यादिकाः क्रमात्।" इति।

अन्येद्युष्कलक्षणमाह।

"अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते।"

एककालं दोषापेक्षया एककालमपि द्वितीयं प्रथमकाले हृद्येव दोषस्थितिः। *। तृतीयकचतुर्थकयोर्लक्षणमाह।

"तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः।"

तृतीयेऽह्नि इत्यागमनदिनं गृहीत्वा। यत उक्तम्।

"दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः।
दिनद्वयं व्यतिक्रम्य यः स्यात् स हि चतुर्थकः।" इति।

अत्राह वृद्धसुश्रुतः।

"कफस्थानविभागेन यथासंख्यं करोति हि।
सततान्येद्युष्कत्र्याख्यचतुर्थकप्रलेपकान्।
अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते।
दोष आमाशयं प्राप्य करोति विषमज्वरम्।"

अयमर्थः। आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथासंख्यं सततादीन् करोति। तत्रामाशये स्थितो दोषः सततं करोति द्वौ कालौ अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति। एककालं नैकस्यादेकस्मिन्नेवाहोरात्रे दोष आमाशयमायाति। तत्र द्वौ दोषकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठे स्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवं शिरःस्थितो दोषोऽहोरात्रात् कण्ठमायाति। ततः पुनरहोरात्राद्धृदयमायाति चतुर्थदिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति। एककालं न तु द्वौ कालौ स्वभावादेव। *। ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम्। उच्यते। दोषो हि प्रकोपशमये वेगवत्तया लाघवात् स्वस्थानम् वेगदिन एव याति। यत आह।

"दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्।
वेगवासर एवायं स्वस्थानमभिगच्छति।"

सन्धिषु स्थितः प्रलेपं करोति। सन्धयश्चामाशयेऽपि सन्ति तेषु स्थितः प्रलेपकं सर्व्वदा करोति। *।

"निवृत्तः पुनरायाति विषमो नियते दिने।
स्वभावं कारणं तत्र मन्यन्ते मुनिपुङ्गवाः।"

स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षाचतुर्थकादिविपर्य्यया अपि ज्वराः स्वस्य काले भवन्ति।

"अग्निशीते यथा भूमिं बीजं काले प्ररोहति।
अग्निशीते तथा धातुन्दोषः काले प्रकुप्यति।"

सुश्रुतोऽप्याह।

"स चापि विषमो देहं न कदाचित् प्रमुञ्चति।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते।
धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यान्नैवोपलभ्यते।"

द्विदोषोल्बणस्य तृतीयकस्य लक्षणमाह।

"कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः।"

त्रिकग्राही वेदनया त्रिकं गृह्णाति इत्यर्थः। *। ननु कफपित्तात्त्रिकग्राही वेदनया त्रिकव्यापी त्रिकस्य वातस्थानं तत्कथं तद्गृहीतौ पित्तकफौ अन्यस्थानगत्वेन दुर्ब्बलत्वेन दुर्ब्बलौ वेगं कुरुते। उच्यते दोषाणां स्थाननियमः न तु कुपितानाम्। तथा च सुश्रुतः।

"कुपितानां हि दोषाणां शरीरे परिधावति।
यत्र सङ्गः स वैगुण्याद्व्याधिस्तत्रोपजायते।"

एवं अन्यस्थानगत्वेन चतुर्थकोऽपि वाच्यम्। वातकफात्मकः पृष्ठात् अथवा पृष्ठं व्याप्य भवति इत्यर्थः। यत्लोपकर्म्मण्यधिकरणे चेति सूत्रेण पञ्चमी। *। कफोल्बणस्य वातोल्बणस्य च चतुर्थकस्य लक्षणमाह।

"चतुर्थको दर्शयति स्वभावं द्विविधं ज्वरः।
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरसोऽनिलसंभवः।"

श्लैष्मिकः श्लेष्मोल्बणः तथा अनिलसंभवः वातोल्बणः। सन्ततादीनां त्रिदोषजत्वात्। उक्तञ्च चरकेण।

"प्रायशः सन्निपातेन पञ्च स्युर्व्विषमज्वराः।" इति।

प्रायशो ग्रहणादेकदोषजाः द्विदोषजा अपि न भवन्ति इति जेज्जटः। पूर्व्वं प्रथमं जङ्घाभ्यां अथवा जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्बणवातजातः शिरसः पूर्व्वं अथवा शिरो व्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः।

"विषमज्वर एवान्यश्चतुर्थकविपर्य्ययः।
अस्थिमज्जगतो दोषश्चतुर्थकविपर्य्ययः।"

अन्यः सन्ततादिपञ्चकादपरश्चतुर्थकविपर्य्ययाख्यो ज्वरः सोऽपि विषमज्वर एव। स किंधातुस्थ इत्यपेक्षायामाह अस्थीत्यादि। तस्य चतुर्थकविपर्य्ययस्य लक्षणमाह।

"स मध्ये ज्वरयत्यह्नी आद्यन्ते च विमुञ्चति।"

चतुर्थकविपर्य्यय इत्युपलक्षणम्। सततादिविपर्य्ययोऽपि बोद्धव्यः। यथा, अहोरात्रे द्वौ कालौ मुञ्चति शेषं सर्व्वमहोरात्रं तिष्ठतीति सततविपर्य्ययः। अहोरात्रे एकं कालं मुञ्चति शेषं सर्व्वमहोरात्रं तिष्ठति इत्यन्येद्युष्कविपर्य्ययः। मध्ये एकं दिनं ज्वरयति आद्यन्ते च दिने मुञ्चति इति तृतीयकविपर्य्ययः। एते विषमज्वरा उपलक्षकाः अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः। यथा,—

"समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः।
रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य तु।"

प्रायो बाहुल्येन। *। सन्ततादीनां शीतपूर्व्वत्वे दाहपूर्व्वत्वे च हेतुमाह।

"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम्।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च।"

शीतं शीतसहितं प्रशान्तयोः प्रशान्तवेगयोः।